ಒಟ್ಟು ಮುದ್ರಿತ ಪುಟಗಳ ಸಂಖ್ಯೆ : 12 ]
Total No. of Printed Pages : 12 ]
ಒಟ್ಟು ಪ್ರಶ್ನೆಗಳ ಸಂಖ್ಯೆ : 38 ]
Total No. of Questions : 38 ]

**A**

**CCE RF**
**CCE RR**

Question Paper Serial No. **101**

ಸಂಕೇತ ಸಂಖ್ಯೆ: **67-S**

**Code No. : 67-S**

इत: कर्तयत

TEAR HERE TO OPEN THE QUESTION PAPER
प्रश्नपत्रमुद्घाटयितुमित: कर्तयत

# ವಿಷಯ : ತೃತೀಯ ಭಾಷೆ — ಸಂಸ್ಕೃತ

# Subject : Third Language — SANSKRIT

# तृतीयभाषा — संस्कृतम्

**(ಶಾಲಾ ಅಭ್ಯರ್ಥಿ & ಪುನರಾವರ್ತಿತ ಶಾಲಾ ಅಭ್ಯರ್ಥಿ / Regular Fresh & Regular Repeater)**

ದಿನಾಂಕ : 08. 04. 2022 ] [ Date : 08. 04. 2022

ಸಮಯ : ಬೆಳಗ್ಗೆ 10-30 ರಿಂದ ಮಧ್ಯಾಹ್ನ 1-30 ರವರೆಗೆ ] [ Time : 10-30 A.M. to 1-30 P.M.

ಗರಿಷ್ಠ ಅಂಕಗಳು : 80 ] [ Max. Marks : 80

### *ಪರೀಕ್ಷಾರ್ಥಿಗಾಗಿ ಸಾಮಾನ್ಯ ಸೂಚನೆಗಳು :*

1. ಈ ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯು ವಸ್ತುನಿಷ್ಠ ಮತ್ತು ವಿಷಯನಿಷ್ಠ ಮಾದರಿಯ 38 ಪ್ರಶ್ನೆಗಳನ್ನು ಹೊಂದಿದೆ.
2. ಈ ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯನ್ನು ಹಿಮ್ಮುಖ ಜಾಕೆಟ್ ಮೂಲಕ ಮೊಹರು (ಸೀಲ್) ಮಾಡಲಾಗಿದೆ. ಪರೀಕ್ಷೆ ಪ್ರಾರಂಭವಾಗುವ ಸಮಯಕ್ಕೆ ನಿಮ್ಮ ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯ ಬಲಬದಿ ಪಾರ್ಶ್ವವನ್ನು ಕತ್ತರಿಸಿ, ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯಲ್ಲಿ ಎಲ್ಲಾ ಪುಟಗಳು ಇವೆಯೇ ಎಂದು ಪರೀಕ್ಷಿಸಿಕೊಳ್ಳಿ.
3. ವಸ್ತುನಿಷ್ಠ ಮತ್ತು ವಿಷಯನಿಷ್ಠ ಮಾದರಿಯ ಪ್ರಶ್ನೆಗಳಿಗೆ ಕೊಟ್ಟಿರುವ ಸೂಚನೆಗಳನ್ನು ಪಾಲಿಸಿ.
4. ಬಲ ಭಾಗದಲ್ಲಿ ಕೊಟ್ಟಿರುವ ಅಂಕಿಗಳು ಪ್ರಶ್ನೆಗಳಿಗಿರುವ ಪೂರ್ಣ ಅಂಕಗಳನ್ನು ತೋರಿಸುತ್ತವೆ.
5. ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯನ್ನು ಓದಿಕೊಳ್ಳಲು 15 ನಿಮಿಷಗಳ ಕಾಲಾವಕಾಶವು ಸೇರಿದಂತೆ, ಉತ್ತರಿಸಲು ನಿಗದಿಪಡಿಸಲಾದ ಸಮಯವನ್ನು ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯ ಮೇಲ್ಭಾಗದಲ್ಲಿ ಕೊಡಲಾಗಿದೆ.

### *परीक्षार्थिनां सामान्यसूचना:*

1. अस्मिन् प्रश्नपत्रे अष्टत्रिंशत् (38) वस्तुनिष्ठा: विषयनिष्ठाश्च प्रश्ना: सन्ति ।
2. इदं प्रश्नपत्रं विपरीतेन आवरणेन मुद्रिताङ्कमस्ति । परीक्षासमये प्रश्नपत्रमुद्घाटयितुं दक्षिणपार्श्वेन कर्तयत । प्रश्नपत्रस्य पृष्ठानि पूर्णानि सन्ति इति वा पर्यालोचयत ।
3. वस्तुनिष्ठानां विषयनिष्ठानां च प्रश्नानां विषये निर्दिष्टा: नियमा: अनुपालनीया: ।
4. प्रश्नानां प्रति अधिकृता: अङ्का: पार्श्वे लिखिता: सन्ति ।
5. प्रश्नपत्रमुत्तरयितुं निर्धारित: समयावधि: प्रश्नपत्रस्य उपरि भागे लिखित: अस्ति । पञ्चदशनिमेषा: प्रश्नपत्रस्य पठनार्थं निर्धारिता: सन्ति ।



Tear here

**I. अधोलिखितप्रश्नेभ्यः चत्वारः विकल्पाः प्रदत्ताः । तेषु समुचितं विकल्पं चित्वा क्रमाक्षरेण सह उत्तरपत्रिकायां लिखत । 8 × 1 = 8**

1. 'पङ्कजम्' अस्य समानार्थकं पदम् इदं भवति ।

   (A) कमलम्  (B) विमलम्

   (C) अमलम्  (D) समलम् ।

2. "सानन्दम्" अस्य विरुद्धार्थकं पदम् इदं भवति ।

   (A) आनन्दः  (B) अशोकः

   (C) सखेदम्  (D) सौन्दर्यम् ।

3. "शैलः" अत्र एषा विभक्तिः वर्तते ।

   (A) प्रथमाविभक्तिः  (B) द्वितीयाविभक्तिः

   (C) चतुर्थीविभक्तिः  (D) सप्तमीविभक्तिः।

4. 'पुस्तकमेलायाम्' अत्र इदं वचनम् भवति ।

(A) एकवचनम्  (B) द्विवचनम्

(C) बहुवचनम्  (D) अन्यवचनम् ।

5. 'शृणु' अत्र एषः लकारः वर्तते ।

(A) लट्लकारः  (B) लोट्लकारः

(C) लङ्लकारः  (D) लृट्लकारः ।

6. 'अयच्छत्' अत्र एषः पुरुषः वर्तते ।

(A) प्रथमपुरुषः  (B) मध्यमपुरुषः

(C) उत्तमपुरुषः  (D) अन्यपुरुषः ।

7. 'छात्रः विज्ञानं ज्ञातुम् इच्छति' । अत्र कृदन्तपदम् इदं भवति ।

(A) छात्रः  (B) विज्ञानम्

(C) ज्ञातुम्  (D) इच्छति ।

8. 'शोभमानः' अत्र एषः प्रत्ययः वर्तते ।

(A) क्तवतु प्रत्ययः (B) तव्यत् प्रत्ययः

(C) तुमुन प्रत्ययः (D) शानच् प्रत्ययः ।

**II. चतुर्थं पदं लिखत ।** **4 × 1 = 4**

9. संस्कृतसाहित्योत्सवः – उज्जयिनीनगरे :: विश्वसंस्कृतपुस्तकमेला – ............ ।

10. कौन्तेयः – अर्जुनः :: मधुसूदनः – .............................. ।

11. पद्यम् – श्रव्यकाव्यम् :: नाटकम् – ......................... ।

12. पूज्यः शैलः – हिमालयः :: पूज्या नदी – ..................... ।

**III. एकवाक्येन उत्तरं लिखत ।** **4 × 1 = 4**

13. विश्वसंस्कृतपुस्तकमेलायां बहुजनाकृष्टं स्थानं किम् ?

14. श्रीकृष्णः कर्णं कैः अभिनन्दति स्म ?

15. कालपर्ययात् का क्षयं गच्छति ?

16. का अस्मान् बध्नाति ?

**IV. द्वित्रैः वाक्यैः उत्तरं लिखत ।** **4 × 2 = 8**

17. ग्रन्थालयस्य ग्रन्थपालः किम् अचिन्तयत् ?

18. दक्षिणामूर्तिं वर्णयत ।

19. विश्वसंस्कृतपुस्तकमेलायां के के अंशाः आसन् ?

20. पञ्च अचोरहरणीयानि कानि ?

**अथवा**

खलसज्जनानां मैत्री कीदृशी भवतीति वर्णयत ।

**V. संस्कृतभाषया अनुवादं कुरुत ।** **1 × 2 = 2**

21. ನಗರದಲ್ಲಿ ಸುಂದರವಾದ ಉದ್ಯಾನವಿದೆ. ಆ ಉದ್ಯಾನದಲ್ಲಿ ವಿಶಾಲವಾದ ಸರೋವರವಿದೆ.

There is a beautiful garden in the city. There is a large lake in the garden.

**VI. कर्नाटकभाषया आङ्ग्लभाषया वा अनुवादं कुरुत ।** **1 × 2 = 2**

22. पुरा भोजभूपालस्य सभायाम् अनेके कवयः आसन् । तेषामेकः कालिदासः नाम ।

**VII.** 23. **विग्रहवाक्यं लिखत ।** **1 × 2 = 2**

a) महाबलः ।

b) लम्बोदरः ।

**अथवा**

**समस्तपदं लिखत ।**

a) शूलं पाणौ यस्य सः = .................

b) विघ्नानाम् अभावः = ...................

**VIII. लक्षणं विलिख्य अलङ्कारस्य नाम लिखत ।** **1 × 2 = 2**

24. 'मुखं चन्द्र इव सुन्दरम्' ।

**IX. यथानिर्देशम् उत्तरं त्रिचतुरैः वाक्यैः लिखत ।** **2 × 3 = 6**

25. "मया एतानि सर्वाणि पुस्तकानि पठितानि" ।

    कः पाठः ? कः अवदत् ? कम् अवदत् ?

26. "भवान् कर्णाय साधुवादं यच्छति" ।

    कः पाठः ? कः अवदत् ? कम् अवदत् ?

**X.** 27. **सन्धिं विभज्य नाम लिखत ।** **1 × 3 = 3**

a) गुरुस्साक्षात्

b) वदनाम्बुजे

c) मुनिर्नमति ।

**XI. प्रस्तारं विलिख्य गणविभागं कृत्वा छन्दोनाम लिखत ।** **1 × 3 = 3**

28. 'सीतां विचेतुं पथि चारणानाम्' ।

**XII. कवेः देश-काल-कृतीनां विषये त्रिचतुरैः वाक्यैः उत्तरं लिखत । 1 × 3 = 3**

29. 'वेदव्यासः' ।

**अथवा**

'भासः' ।

**XIII. पद्यपाठस्य नाम विलिख्य तात्पर्यं पञ्चषैः वाक्यैः कर्नाटकभाषया, संस्कृतभाषया, आङ्ग्लभाषया वा लिखत । 3 × 3 = 9**

30. चिन्तामणिः प्रणमतां निशामणिशिरोमणिः ।
कपाली लोकपाली वः पातु नित्यं महाबलः ।।

31. चतुर्विधा भजन्ते मां जनाः सुकृतिनोऽर्जुन ।
आर्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ ।।

32. भारतवासिषु बाह्ये भेदे
बहुत्र बहुधा दृष्टेऽपि ।
आन्तरङ्गिकी संस्कृतिरेका
सनातनी नो बध्नाति ।।

**XIV. पद्यपाठस्य नाम विलिख्य पद्यं पूरयत ।** **1 × 3 = 3**

33. सदयं ........................................................................ ।

........................................................................ किम् ॥

**XV. दशवाक्यैः उत्तरं कर्नाटकभाषया, आङ्ग्लभाषया, संस्कृतभाषया वा लिखत।** **2 × 4 = 8**

34. इन्द्रकर्णयोः सम्भाषणं सङ्गृह्य लिखत ।

35. 'उभयभारती भारतस्य आदर्शनारी' इति विषय सङ्गृह्य लिखत ।

**अथवा**

'विक्रमः वेतालश्च' कथायां धर्मध्वजस्य भार्यासु कतमा सुकुमारतमा इति कथं निरूपितम् ? लिखत ।

**XVI. अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नान् उत्तरत ।** **1 × 4 = 4**

36. एकस्मिन् वने काचन मूषिका वसति स्म । एकदा सा कञ्चन मार्जालम् अपश्यत् । सा मूषिका मार्जालेन भीता अभवत् । तदा मूषिका कस्यचन ऋषेः आश्रमम् आगता ।

मूषिका स्वस्य समस्यां ऋषेः पुरतः अवदत् । सः ऋषिः दयापूरितः आसीत् । स्वस्य तपः शक्त्या सः तां बालिकाम् अकरोत् । दिने दिने वर्धिता सा बाला क्रमेण युवतिः बभूव । विवाहे तां योग्यवराय प्रदातुम् ऋषिः अपेक्षितवान् । एकदा स ऋषिः ''त्वं कं परिणेतुम् इच्छसि ?'' इति युवतिम् अपृच्छत् । तदा ''सर्वेभ्योऽपि बलिष्ठं वरयितुम् इच्छामि'' इति सा युवतिः अवदत् ।।

i) का मार्जालेन भीता अभवत् ?

ii) मूषिका कुत्र आगता ?

iii) ऋषिः किम् अपेक्षितवान् ?

iv) अन्ते युवतिः किम् अवदत् ?

**XVII. दशवाक्यैः प्रबन्धं लिखत ।** **1 × 4 = 4**

37. ''जनसंख्यास्फोटः'' ।

**अथवा**

''परिसरसंरक्षणोपायाः'' ।

**XVIII. पत्रं लिखत ।** **1 × 5 = 5**

38. बेलगाविमण्डलस्य सर्वकारीयविद्यालयस्य छात्रः/छात्रा इति मत्वा स्वस्य अध्ययनविषये मङ्गलूरुनगरे वर्तमानं मित्रं प्रति पत्रं लिखत ।

**अथवा**

बेलगाविमण्डलस्य सर्वकारीयविद्यालयस्य छात्रः/छात्रा इति मत्वा दिनत्रयस्य विरामं सम्प्रार्थ्य मुख्योपाध्यायं प्रति विरामपत्रं लिखत ।